# मलमासस्य विमर्शः

दामोदरगौतमः
सहप्राध्यापकः – धर्मशास्त्रम्
ने.सं.वि, पिण्डेश्वर विद्यापीठम्, धरानः
gdamodar797@gmail.com
https://doi.org/10.3126/pj.v5i8.73797

**लेखसारः**

मस् परिमाणे इत्यस्माद्धातोर्निष्पन्नोऽयं मासशब्दः । मस्यते परिमीयते यावता कालेन चन्द्रस्य वृद्धिक्षययोः स चान्द्रो मासः । चान्द्रमासः शुक्लादिशुक्लपक्षस्य प्रतिपदात आरभ्य दर्शान्तः अमावास्यान्तः एक चान्द्र मासः व्यवह्रियते । चान्द्रमासो विशेषतः आभ्युदयिके पितृकार्येऽन्यव्रतपर्वणि च प्रशस्यते । चान्द्रमासः शुद्धमासः विद्धमासो (मलमास) रूपेण द्विविधो भवति । काम्यकर्मणां प्रारम्भः समाप्तिश्च मलमासे न भवति । मलमासे अन्यानि कर्माण्यपि प्रतिबन्धकीभूतानि दृश्यन्ते । मलमासविषये विभिन्नानि धर्मशास्त्रीयाणि मतमतान्तराणि विद्यन्ते । तेषु ग्रन्थोक्तदिशमवलम्ब्य मलमासस्वरूपं कालः, मलमासः कदा केन कारणेन आयाति ? मलमासे कार्याकार्यकर्म जप-तप-दानादेः फलं प्राप्यते न वा ? देवकार्यं पितृकार्यं च मलमासे कथं क्रियते ? मलमासे विहितं कर्म, निषिद्धं कर्मादिविषये शास्त्रीयं मतमवलम्ब्यात्र प्रकाशनं विधीयते ।

*शब्दकुञ्जिका* – आभ्युदयिकं कर्म, काम्यकर्म, देवकार्यम्, पितृकार्यम्, मलमासः, संवत्सरः ।

## विषयप्रवेशः

कालगणनायां वत्सरः पञ्चविधः भवतीति धर्मशास्त्रे ज्योतिषशास्त्रे चोल्लिखितं प्राप्यते । तत्र सौर्यसंवत्सरः बार्हस्पत्यसंवत्सरः सावनसंवत्सरः चान्द्रसंवत्सरः नाक्षत्रिकसंवत्सरश्चेति प्रसिद्धाः सन्ति । पञ्चसंवत्सरेषु मध्ये सौर्यसंवत्सर चान्द्रसंवत्सरयोर्मध्ये द्वयोर्गणनयोः ३६५ दिनात्मकः सौर्यसंवत्सरः ३५४ दिनात्मकश्चान्द्रसंवत्सरः सामान्यतया ३२ मासे वा पञ्चमे पञ्चमे वर्षे द्वौ मासौ अधिमासकौ भवतः । सौर्यसंवत्सरस्य पञ्चमे वर्षे व्यतीते सति चान्द्रमासस्य द्वौ मलमासौ आयातः । कालस्य मलरूपेण विकाररूपेण समागतत्वात् एषः मासः समयगणनायां योजितः मलमासः (मलानाम् मासः मलमासः)

एतन्नाम्नानैव व्यवह्रियते । अस्मिननुसन्धाने मलमासे विहितं कर्म अविहितं कर्म काम्यकर्म, नित्यकर्म, नैमित्तिकं कर्म, कार्यफलं प्राप्यते न वा इत्यादिविषये शास्त्रसम्मतं विमर्शनं कृत्वा सैद्धान्तिकं मतं स्थापयित्वा मलमासः, अधिकमासः, क्षयमासः नामधेयत्वं शास्त्रसम्मतविधिना उपस्थापितोऽस्ति।

**समस्याकथनम्**

धर्मशास्त्रेषु ग्रन्थोक्तदिशमवलम्ब्य मलमासस्य स्वरूपं काल, मलमासः कदा केन कारणेनायाति ? मलमासे कार्याकार्यं कर्म जपतपदानादेः फलं प्राप्यते न वा ? देवकार्यं पितृकार्यं च मलमासे कथं क्रियते ? मलमासे विहितं कर्म, अविहितं कर्म आदिविषया एवास्यालेखस्य मुख्याः प्राज्ञिकाः समस्या विद्यन्ते । ताश्चात्र विन्दुरूपेणोपस्थाप्यन्ते –

क) मलमासे शुभकर्म क्रियते न वा ?

ख) अधिकमास-क्षयमासयोः पृथक्ता कीदृशी ?

ग) क्षयमासः कियत्कालेन किं कारणेन आपतति ?

**उद्देश्यनिर्धारणम्**

धर्मशास्त्रेषु प्रसृतं मलमासस्य स्वरूपं निरूप्य तत्सम्बद्धायाः प्राज्ञिकायाः जिज्ञासायाः समाधानमेवास्यालेखस्य मुख्यमुद्देश्यमस्ति । मलमासः (अधिकमासः क्षयमास) ज्ञानेन देवकार्यं पितृकार्यं नित्यकर्म नैमित्तिकं कर्म काम्यकर्म च किं किं करणीयं न करणीयं भवतीति विषयस्य प्रकाशनमस्योद्देश्यमस्ति। कीदृशं कर्म मलमासे वर्जितम्। शुद्धमासे मृतानां मलमासे वार्षिकश्राद्धः, मलमासे मृतानां वार्षिकैकोदिष्टश्राद्धः कदा क्रियते इति विषयं यथाशास्त्रं पर्यालोचनमत्र विधीयते । मलमासे (पुरुषोत्तम मासे) अपूपदानफलादिज्ञानाय विविधशास्त्रीयमतमवलम्ब्य अत्र प्रकाशनञ्च क्रियते।

## अनुसन्धानविधिः

शास्त्रसम्मतानां सामग्रीणां सङ्कलनाय पुस्तकालयस्योपयोगो विहितः । धर्मशास्त्रीयाणां प्रामाणिकानां ग्रन्थानामध्ययनं कृत्वां विभिन्नानां धर्माशास्त्राचार्याणां मतानि मधुकरविधिनावलम्ब्य वर्णनात्मकरूपेण विषयस्योपस्थापनं विधीयते।

**अध्ययनसीमा क्षेत्रञ्च**

कालमाधवः, धर्मसिन्धुः, निर्णयसिन्धुः पुरुषार्थचिन्तामणिः, चतुवर्गचिन्तामणिः इत्यादिग्रन्थानां तथान्यानि कालनिर्णयः, मलमासनिर्णयसम्बद्धानि मतानि समीक्ष्य अस्मिन् अनुसन्धानात्मके लेखे स्थापितमस्ति। एतदेवास्यालेखस्य सीमा विद्यते।

## विषयविश्लेषणम्

मलमासः यदा चान्द्रो मासोऽसंक्रान्तो मलमासः प्रकीर्तितम् । चान्द्रसङ्कान्तिः शुक्लपक्षस्य प्रतिपदातिथौ मन्यन्ते । शुक्लप्रतिपदातः आगामीकृष्णामावास्यापर्यन्तं सौर्यसङ्क्रान्तिर्नायाति चेत् सः चान्द्रमासः मलमासशब्देन व्यवह्रियते । मलमासोऽपि अधिकमासत्वेन क्षयमासत्वेन च द्विविधो भवति । यस्मिन् वर्षे मलमास आपतति तस्मिन् वर्षे (१३) त्रयोदशमासस्य चान्द्रवर्षो भवति । सौर्यमानस्य सामान्यतया गणनानुसारेण ३० दिनात्मकैव मासः ३६५ दिनात्मकश्च वर्षः भवति । तत्र मलमास कथं आयाति इति जिज्ञासा समुदेति । तत्र मासः वत्सरश्च पञ्चप्रकारकाः भवन्ति । सौर्यसम्वत्सर ३६५ दिनात्मकः वार्हस्पत्य संवत्सरः ३६१ दिनात्मकः, सावनसंवत्सरः ३६० दिनात्मकः, चान्द्रसंवत्सरः ३५४ दिनात्मकः, नाक्षत्रसंवत्सरः ३२४ दिनात्मकः भवति । सौर्यसंवत्सरः चान्द्रसंवत्सरादेकादशभिर्दिनै अधिकः दृश्यते । तस्मात् कारणात् हि चान्द्रसंवत्सरस्य समाद्वये अष्टमे मासे एकः मासः अधिकः भवति । स एवाधिको मासः कथ्यते । यथा-

सौरसंवत्सरस्यान्ते मानेन शशिजेन तु
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ।
समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ।
स चाधिमासकः प्रोक्तः काम्यकर्मसु गर्हितः ॥ (कालमाधव - ५३)

तत्र द्वादशमासानां स्वामिनः द्वादशाः सूर्याः भवन्ति । एतादृशमलमासः स्वामीरहितत्वात् कालाधिक्यादयं नपुंसकः मासः इत्यपि कथ्यते । यथा-

असङ्क्रान्तो हि यो मासः कदाचित्तिथिवृद्धितः ।
कालान्तरात् समायाति स नपुंसक इष्यते ॥ (काल. ५४)

मासस्य स्वामी पुरुषः सूर्यः । स्वामीरहित मासः नपुंसकः मासः भवति । सूर्यस्य द्वादशनामानि अरुणः, सूर्यः, भानु, तपनः, चन्द्रः, रविः, गभस्तिः, अर्यमा, हिरण्यरेता, दिवाकरः, मित्रः, विष्णुश्च सन्ति । एते द्वादशनामधेयाः सूर्याः माघमासेषु मासं तपते । सूर्यरहितमासः मलिम्लुचाख्यः पापं नपुंसकः मासः भवेदिति कथ्यते । मलिम्लुचाख्ये पापात्मके मासे क्रियमाणं काम्यकर्म च फलप्रदाने समर्थः भवति । अतः एतस्मिन् मासे काम्यकर्म निमित्तकर्मणश्च निषेधः विहितः इति ज्ञायते । एतादृशमलमासस्य पातनसमये विभिन्नैः विद्वद्भिः पृथक् पृथक् मतानि निर्दिष्टानि सन्ति । यथा-

द्वात्रिंशद्भिर्गतैर्मासै दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतति ह्यधिमासकः ॥ (वसिष्ठ) निर्णयसिन्धु ११ )

अत्र सिद्धान्तेऽभिहितम् यत् द्वात्रिंशद् मासः षोडशः दिवसः चतस्रः घटिका व्यतीते सति मलमासः समापतति। काठकगृहे चाह –

यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा।
मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत्॥ (कालमाधवः ५५)
पञ्चमे पञ्चमे वर्षे द्वौ मासावधिमासकौ।
तेषां कालातिरेकेण ग्रहाणामतिचारता॥ (महाभारते)

उपरितने कथने त्रिंशत्तमः द्वात्रिंशत्तमश्च मासः पञ्चमे पञ्चमे वर्षे द्वौ मासावधिकौ। महाभारतोक्तं पञ्चमे पञ्चमे वर्षेऽधिकमासस्य प्रमाणं व्यावहारिकं दृश्यते। मलमासस्येतिहासावलोकनेन दृश्यते यत् चित्रभानुः नामके संवत्सरे वैशाखमासे मलमासः आसीदिति। तदनन्तरं पार्थिवनामके संवत्सरे भाद्रमासे मलमासः आसीत्। तत्र कालगणनायां मासगणनायां च एकोनत्रिंशन्मासाः भवन्ति। अपरे खरनाम्नि संवत्सरे भाद्रमासे मलमासः आसीदिति च। अत्रापि उनत्रिंशन्मासेसु मासान्तराले अधिकमासः आपतितः दृश्यते। तस्मात् कारणात् महाभारतोक्तञ्च वचनं समुचितं व्यावहारिकं च मन्यते।

त्रिंशत्षट्त्रिंशमासस्य बाह्याभ्यान्तरयोर्द्वयोः।
अधिमासोऽवकल्पेत बादरायणः कीर्तितः॥ (पुरु. १९)

'चैत्रायामावास्यायां मेषसंक्रान्तिः ततः शुक्ल प्रतिपदारभ्य अमावास्यापर्यन्तं सङ्क्रान्तिर्नास्ति। ततः शुक्लप्रतिपदि वृषसङ्कान्ति इति पूर्वं सङ्क्रान्तिरहितोमासोऽधिकः वैशाखसंज्ञाः। वृषसङ्क्रान्तियुतस्तु शुद्धवैशाखनामकः मासः भवति' (धर्मसिन्धुः – ८)।

अधिकमासवत् क्षयनामक मलमासोऽपि भवति। यथा सौर्ये चान्द्रसंवत्सरमानमवलम्ब्य अधिकमासः व्यवह्रियते। तथैव कालान्तरात् समये समये किञ्चित् किञ्चित् निश्चिता घटिका पला च न्यूनतां गत्वा कालान्तरे समये तन्न्यूनमेव समयः मासरूपेण समाकलितो भवति। सः क्षयाख्यः मासः निगद्यते। यस्मिन् चान्द्रमासे द्वे सूर्यसंक्रान्ती भवतः सैव क्षयमासः भवति। एषोऽपि मलमास एव निगद्यते। एतादृशः क्षयमासः कार्तिकः मार्गशीर्षः पौषः एतेषु मासत्रयेषु कस्मिञ्चिदेकमासे निपतति। क्षयमासः ततोऽन्यस्मिन् मासे नापतति।

यस्मिन् वर्षे क्षयमासः भवति तस्मिन् वर्षे द्वौ अधिमासौ भवतः। क्षयमासात् प्राक् त्रिमासाभ्यन्तरे एक अधिकमासः भवति। क्षयमासात् पश्चात् त्रिमासाभ्यन्तरे चापरः अधिकः मासः भवति।

असंक्रान्तमासोऽधिमासः स्फुटः स्याद्
द्विसंक्रान्तमासः क्षयाख्यः कदाचित्।

क्षयः कार्तिकादित्रये नान्यदा स्यात्

तदा वर्षमध्येऽधिमास द्वयं च ॥ (कालमाधवः - ६१)

शुक्लप्रतिपदायां एका सौर्यसङ्कान्तिः आपतति । ततश्च अमावास्यायां अपरः सौर्यसङ्कान्ति आपतति चेत् एकः चान्द्रमास सौर्यसङ्कान्तिः भवति, स च क्षयमासः भवति । चान्द्रमासस्य सङ्कान्तिः शुक्लपक्षस्य प्रतिपदातः मन्यन्ते, मलमासः शुक्लपक्षतः भवति । मलमासे प्रथमतः शुक्लपक्षः समायाति तदनन्तरं कृष्णपक्षः । क्षयमासो यदा धनुस्थे रवौ दर्शपूर्तिस्तदा तस्य मेषादिस्थवचनेन मार्गशीर्षत्वं प्राप्तम् । तथा सति पूर्वोदाहृते दिसङ्क्रान्तमासे धनुस्थे रवौ दर्शे न समाप्तः, किन्तु मकरस्थे । अतः पौषमासत्वं तस्य सम्पन्नम्, तथा च मार्गशीर्षस्य तत्र लुप्तत्वात् तस्य क्षयसंज्ञा युक्ता भवति । क्षयमास चिरकालात् कदाचित् आयाति, अधिकमासवत् पुनः पुनस्तु नायाति । क्षयमासपतनकालविषये सिद्धान्तशिरोमणिनाभिहितम् –

गतेऽब्ध्यद्रिनन्दैर्मिते शाककाले

तिथीशैर्भविष्यत्यथाङ्गाक्ष सूर्यैः ।

गजाद्र्यग्निभूमिस्तथा प्रायशोऽयं

कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्च ॥

कु एकः, वेदाः चत्वारः, इन्दुः एकः तथा समेत्य १४१ वर्षे क्षयमासः निपतति । कदाचित् क्षयमासः विकल्पेन १९ उनविंशति वर्षे च अपवादरूपेण निपतति । सामान्यतोऽधिमासः चैत्रमासादर्वाक् अधिकमासः न भवति ततः परतः भवति –

चैत्रादर्वाङ्नाधिमास परस्ताद्दधिको भवेत्,

घटकन्यागते सूर्ये वृश्चिके वाथ धन्विनि ।

मकरे वाथ कुम्भे वा नाधिमासो विधीयते ॥ (चतुः २८)

श्रुतिरपि – 'संसर्पोऽस्यहंस्पतये त्वेत्याह अस्ति त्रयोदशो मास क्षयाधिकमासौ तु श्रौतस्मार्त काम्यकर्मस्वपि निन्दितो अतः न कर्तव्यम्' इति ।

यस्मिन् वर्षे क्षयमासो भवति तस्मिन् वर्षे द्वावधिकमासौ क्षयमासश्च मासत्रयं निन्दित मासाः भवन्ति । तथा चोक्तम् -

यद्वर्षमध्येऽधिकमासयुग्मं तत्कार्तिकादि त्रितये क्षयाख्ये ।

मासत्रयं त्याज्यमिदं प्रयत्नाद् विवाह-यज्ञोत्सवमङ्गलेषु ॥

एवं पुरुषार्थ चिन्तामणावपि - १७

मलिम्लुचं समाक्रान्तं सूर्यसङ्क्रान्तिवर्जितम् ।

मलिम्लुचं विजानीयात्सर्वकर्मसु गर्हितम् ॥

पौषात् अतिरिक्तेषु मासेषु मध्येऽन्यतमः मलमासो भवति

दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित् ।

नपुंसकत्वं भवतीत्येषः शास्त्रस्य निश्चयः । (पुरु -१९ )

इति वचनादत्र पौषमासात् भिन्नमासेषु अधिकमासः भवति । अधिकमासः क्षयमासः नपुंसकः मासः पुरुषोत्तममासः मलमासः सर्वे मलमासस्य पर्यायवाचिनः शब्दाः सन्ति । मलेन आक्रान्तत्वात् मलमासः यस्मिन् वर्षे मलमासः भवति तस्मिन् वर्षे त्रयोदशचान्द्रमासाः भवन्ति । त्रयोदशः मलमासः स्वामीरहित सूर्यनामरहितः मासः नपुंसकः मासः । तथा चाह -

असूर्या नाम ये मासाः न तेषु मम सम्मतः

व्रतानां चैव यज्ञानामारम्भश्च समाप्तयः ॥ (काल ६९)

**मलमासे कार्याकार्यनिर्णयः-**

श्रौतस्मार्त क्रिया सर्वा द्वादशे मासि कीर्तिता

त्रयोदशे तु सर्वास्ता निष्फलाः परिकीर्तिता ॥

श्रौतं कर्म वेदविहितं कर्म । स्मार्तं कर्म स्मृतिविहितं कर्म । श्रुतिस्मृतिपुराणोक्तानि कर्माणि मलमासे प्रारम्भः समाप्तिश्च विवर्जयेत् । कर्म क्रियमाणेऽपि फलोद्देश्येन कृतं कर्म फलं न ददाति । तत्कर्म निष्फलं भवति । तत्र काम्यकर्म तु पूर्णरूपेण वर्जितः । नित्यकर्म नैमित्तिकं अनन्यगतिकं कर्म तु कर्तुं शक्यते । यथा-

नित्यनैमित्तिके कुर्याच्छ्राद्धं कुर्यान्मलिम्लुचे ।

तिथिनक्षत्रवारोक्तं काम्यं नैव कदाचन ॥ (जावालि -नि. सि. २१)

गर्भे वार्धुषिके भृत्ये श्राद्धे कर्माणि मासिके ।

सपिण्डीकरणे नित्ये नाधिमासं विवर्जयेत् ॥

तीर्थ स्नानं जपो होमो यवव्रीहितिलादिभिः ।

जातकर्मान्त्य कर्माणि नव श्राद्धं तथैव च ॥

मघा त्रयोदशी श्राद्धं श्राद्धान्यपि च षोडशः ।

चन्द्रसूर्ये ग्रहे स्नानं श्राद्धदानजपादिकम् ॥

कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा ॥ (पुरु-३६)

उपर्युक्तानि कार्याणि श्राद्धादिनि तथा पूर्वतीर्थयात्रा नित्यकर्म नैमित्तिकं कर्म (ग्रहण स्नान दानादिनि) कर्मसम्बन्धिनि सिमन्तोन्नयनम्, पुंसवनादिसंस्काराश्च मलमासेऽपि कर्तुं शक्यते। मलमासेऽपि शास्त्रविहितानि कर्माणि क्रियन्त एव। तत्र विहितानि कर्माणि यथा –

नित्ये नैमित्तिकं कुर्यात्प्रयतः सम्मलिम्लुचे।
तीर्थश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव च॥ (वृहस्पति-पुरु. ३७)

नित्यकर्म शुद्धमासवत् मलमासेऽपि कर्तव्यम् अकरणे प्रत्यवायः भवति। तस्मात् नित्यकर्म अहरहः कर्तव्यम्। काम्यकर्माण्यपि अनन्यगतिकं कर्म चेत् (समयव्यतीते सति पुनः तत् कर्म कर्तुं न शक्यते चेत् यथा कारिर्यादियागः करणीयो भवति। यथा 'वृष्टिकामो कारिर्यादि यजेत' इति वचनानुसारेण मलमासेऽपि वृष्टिकाले वर्षा भवेत् इति कामनया यज्ञः भावयेत्। तस्यागतिकत्वात् समये व्यतीते अनावृष्ट्या प्राणिमात्रस्य क्षतिः भवति इति शङ्कया विधानं निर्दिष्टं ज्ञायते। तादृशमनन्यगतिकं कर्म तु मलमासेऽपि कार्यम्।

मलमासस्यापरं नाम पुरुषोत्तममास इति। गोलोकवासिना परमात्मना श्रीकृष्णेन भगवता मलमासाय स्वनाम पुरुषोत्तमः इति नाम दत्वा अत्युत्तम नामधेयः पुरुषोत्तममासः इति पुराणेषु सुस्थापितम्। तस्मात् पुरुषोत्तममासः निमित्तकः व्रत-पाठ-पारायण-पूजा-जप-तप-दानादिकं कर्म निष्कामरूपेण भगवद्भक्तिप्रकटनाय कर्तुं शक्यते। तादृशानि कर्माणि तु तदा विहितानि दृश्यन्ते। मलमासे एकमास पर्यन्तमपुपदानफलमत्युत्तमदानकर्मरूपेण वर्णितं प्राप्यते। तथा च प्रसिद्धम् 'पुरुषोत्तममासमहात्म्यम्' ग्रन्थः सोऽयमिदानीं प्राप्यते।

सर्वेभ्यः साधनेभ्योऽयं मासः श्रीपुरुषोत्तमः
कांस्यपात्रे पूरयित्वा पूर्णस्त्रिंशन्मितान् मुदा। (पुरुषोतम १३३)
विष्णुरूपं सहस्रांशुः मलमासे तु पूजयेत्।
मलमासस्तु मासानां मलिनः पापसम्भवः॥
तस्य पाप विशुद्ध्यार्थ मलमासव्रतं चरेत्।
दिने दिने प्रदेयानि विविधान्नानि शक्तितः॥
अधिमासे तु सम्प्राप्ते गुडसर्पिः समन्वितान्।
दद्यादनेन मन्त्रेण त्रयस्त्रिंशदपुपकान्।
यावन्ति तत्र च्छिद्राणि अपुपस्य च पार्थिव
तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ (पुरु २४४)

एवं प्रकारेण पुरुषोत्तममासस्य प्रशंसा विहिता वर्तते। तत्र श्रीहरिप्रीतये कर्तव्यानि व्रतदानविशेषाणि च तथापूपदानस्य विशिष्टा महिमा च पुरुषोत्तममासमहात्म्ये प्राप्यते।

येषां सर्वोत्तमो मासः स्नानदानजपैर्गता

दानानि पितृकार्याणि तपांसि विविधानि च ॥

तानि कोटिगुणान्येव सम्प्राप्ते पुरुषोत्तमे ॥ (पुरुषोत्तम- २६५)

पुरुषोत्तममासं विष्णुरूपं स्मृत्वा भगवतः विष्णोः पूजार्चनाव्रतदानानि विशेषतो गुडसर्पियुक्तस्य अपूपस्य त्रयस्त्रिंशत् सङ्ख्याकं यावत् छिद्रयुक्तस्य अपूपस्य तावद् वर्षपर्यन्तं वर्षसहस्राणि पर्यन्तं स्वर्गलोके महीयते इति फलं निर्दिष्टमस्ति । मलमासे काम्यकर्मणां प्रतिबन्धनेऽपि तथा भूतोऽपि निष्कामं कर्म फलेन स्वर्गलोके महीयते । मलमासे कृतेन कर्मफलेन यजमानः पुण्यफलेन युज्यत इति निश्चयमेव तस्मात् किमधिकम् ।

**मलमासे निषिद्धं कर्म (अकार्यं कर्म)**

अग्न्याधानम्, मूर्तिप्राणप्रतिष्ठा, गृहप्रवेशः, उपाकर्म, वृषोत्सर्गः, चूडाकरणम्, विवाहः, कूपतडागादीनां निर्माणमपूर्वतीर्थयात्रागमनं राज्याभिषेकः व्रतारम्भः व्रतोद्यापनादीनि कर्माणि मलमासे वर्जितानि सन्ति । तथा चाह वृद्धमनुः -

अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च ।

देवव्रतवृषोत्सर्गं चूडाकरणमेखलाः ॥

माङ्गल्यमभिषेकं च मलमासे विवर्जयेत् ॥ (काल- ८२)

अधिमासे न कर्तव्ये श्राद्धे सांवत्सराब्दिके ।

वर्षवृद्ध्यभिषेकादिकर्तव्यमधिके न तु ।

अधिमासे न कर्तव्यं श्राद्धमाभ्युदयं तथा ।

तथैव काम्यं यत्कर्म वत्सरान् प्रथमादृतेः ॥

सपिण्डीकरणादूर्ध्वं यत् किञ्चित् श्राद्धिकं द्विजैः ॥

इष्टं वाप्यथवापूर्तं तन्न कुर्यान्मलिम्लुचे ॥

इतोऽन्यत्र जपतपदानव्रतोपासनादिकृते व्यर्थः परिश्रम एव भवतीति कथयन्ति ।

तत्र दत्तमदत्तं वा हुतं न हुतमेव वा ।

सुजप्तमप्यजप्तं स्यान्नोपवासकृतं भवेत् ॥

कालदर्शे मलमासे प्रायश्चित्तमुपाकर्म वृषोत्सर्गः सर्पवलिः हरिशयनं परिवर्तनमुत्सवः दुर्गइन्द्रध्वजस्थापनादिकर्माणि मलमासे वर्जितानि सन्ति । तथा चाह निर्णयसिन्धौ -

प्रायश्चित्तं तु सर्वस्य मलमासे विवर्जयेत् ।

उपाकर्मोत्सर्जनं च पवित्र दमनार्पणम् ।

अवरोधश्च हेमन्तः सर्पाणां बलिरष्टका।
ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम्।
दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानं च वज्रिणः।
पूर्वत्र प्रतिषिद्धानि परत्रान्यच्च दैविकम्॥ (नि. सि. २८)

उपर्युक्तवचनानुसारेण मलमासे काम्यकर्मणः सर्वत्र निषेधः ज्ञायते। अनन्यगतिकं कर्म तत्कालैव कार्यम् सगतिकं कर्म शुद्धमासे एव कर्तव्यमिति शास्त्रनिर्देशोऽवगम्यते। तद्भिन्नं सामान्यं कर्म सामान्यतया देशकालस्थानावस्थानुसारेण शुद्धमासे एव कर्तुं शक्यते। सामान्यं कर्म कूप–उद्याननिर्माणं नूतनवस्त्रालङ्कारधारणं तुलापुरुषदानादिकमपूर्वतीर्थयात्रागमनमपूर्वदेवदर्शनम् संन्यासग्रहणं शपथग्रहणमेतानि कर्माण्यपि मलमासे वर्जितानि सन्ति।

**मलमासे मृतानां मासिक-वार्षिक-श्राद्धव्यवस्था**

मलमास शुक्लपक्षस्य प्रतिपदात आरभ्यते मलमासः षष्टि (६०) दिनात्मकः चान्द्रमासः भवति। विद्धशुक्लपक्षे मृतानाम् आगामिनि वर्षे तस्यैव मासस्य शुक्लपक्षे वार्षिकं श्राद्धं भवति। विद्धकृष्णपक्षे मृतानां तु तस्योत्तरवर्तिमासस्य कृष्णपक्षे त्रयोदशे मासे वार्षिकं श्राद्धं भवति। यथा-२०७८ तमे वर्षस्य कार्तिक विद्धकृष्णपक्षे मृतानां २०७९ वर्षस्य मार्गशीर्षकृष्णपक्षे वार्षिकं श्राद्धं भवति। तथा पैठिनसि चाह –

मलमासे मृतानां तु श्राद्धं यत् प्रतिवत्सरम्।
मलमासे तु कर्तव्यं नान्येषां तु कदाचन॥

प्रस्तुतश्लोकानुसारेण मलमासे मृतानामेव मलमासे श्राद्धं क्रियते। शुद्धमासे मृतानां मलमासे श्राद्धं न भवति। एकादशदिनस्य द्वादशदिनस्य च तथा सपिण्डीकरणं विहायान्यं श्राद्धं मलमासे मृतानां शुद्धमासे एव कर्तव्यं भवति। हारितोऽपि आह -

मलमासे प्रमीतानां श्राद्धं यत् प्रतिवत्सरम्।
मलमासेऽपि तत्कार्यं नान्येषां तु कदाचन॥
मृतेऽहनि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात्।
मातुश्च खगशार्दूलवत्सरान्ते मृतेऽहनि॥
नाहं तस्य खगश्रेष्ठ ! पूजां गृह्णामि नो हरिः।
न ब्रह्मा न च वै रुद्रो न चान्यो देवता गणाः।

मलमासे मृतानां कालान्तरे तस्यैव मासे मलमासः समायाति चेत् मलमासे, तथा शुद्धमासेऽपि द्वे श्राद्धे करणीये । मलमासे मृततिथावामान्नेन (पिण्डरहितः) श्राद्धं कर्तव्यम् । शुद्धमासे प्रथमवार्षिकश्राद्धात् प्रतिवार्षिककृतत्वात् । तेन कारणेन पिण्डदानेन श्राद्धं कर्तव्यम् । यथा-

श्राद्धीयेऽहनि संप्राप्ते मलमासो भवेद्यदि ।
मासद्वयेऽपि कुर्वीत श्राद्धमेव न लुप्यते ।
षष्ठ्यां तु दिवसैर्मासः कथितो वादरायणैः ।
उत्तरे देवकर्माणि पितृकार्याणि चोभयोः ।

क्षयमासे मृतानां तु हेमाद्रौ चाह -

तिथ्यर्धे प्रथमे पूर्वो द्वितीयेऽर्द्धे तथोत्तरः ।
मासाविति वुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ ॥ (नि.सि.-२८)

कार्तिकशुक्लप्रतिपदि वृश्चिकसङ्क्रान्तिः । ततो मार्गशीर्षशुक्लप्रतिपदि धनुः सङ्क्रान्तिः । तस्मिन्नेव मासेऽमावश्यायां मकरसङ्क्रान्तिरिति धनुर्मकरसङ्क्रान्तिद्वययुक्तएको मासः क्षयमाससंज्ञकः । स च मार्गशीर्षपौषाख्यमासद्वयात्मकएको मासो ज्ञेयः । तस्य प्रतिपदादितिथीनां पूर्वार्द्धे मार्गशीर्षः । उत्तरार्धे पौषमासः बोध्यः । एवं प्रकारेण सम्पूर्णतिथीनां मासद्वयात्मकं ज्ञेयम् । तिथेः पूर्वार्द्धे ३० घटिका मध्ये मृतानां वार्षिकश्राद्धः मृतमासे एव तत्तिथौ भवति । ३० घटिकापश्चात् ६० घटिकापर्यन्तं मृते सति उत्तरवर्तिमासे वार्षिकश्राद्धं भवति । यथा २०७४ मार्गशीर्षस्याष्टमीतिथौ पूर्वार्द्धे ३० घटिकामध्ये मृतानां वार्षिकश्राद्धं २०७५ वर्षे मार्गशीर्षमासस्याष्टीतिथौ भवति । तस्मिन्नेवाष्टमीतिथौ ३० घटिकापश्चात् ६० घटिकापर्यन्तं समये मृतानां वार्षिकश्राद्धं पौषशुक्लपक्षस्याष्टमीतिथौ भवति ।

**निष्कर्षः**

मलमासः "मलं वदन्ति मासानां, मासानां मलः विकारः, अतः सः त्याज्यमासः । न केवलं मलमासमात्रं अपितु पुरुषोत्तममासनामधेयं मलमास विद्यते । एतस्यान्यं नाम मलमासः अधिकमासः क्षयमासः पुरुषोत्तममास इति नामानि च सन्ति । मलमासे किं किं कार्यं कर्तव्यं किं किं कार्यं न कर्तव्यमिति सर्वं शास्त्रसम्बद्धं सम्यक् ज्ञात्वा तत् सम्बन्धिनि कर्मणि देवकार्य-पितृकार्य-कार्याकार्यं कर्म विचार्यते । मलमासे निषिद्धकर्मकरणेन फलावाप्तिर्न भवति । मलमासेऽकार्यं कर्म कृते सति वृथा परिश्रमः धनसम्पत्तेः हानि तथा व्यर्थं परिश्रममात्रं भविष्यति फलप्राप्तिर्न भवति । तादृशं कर्म बालुकायां जलविन्दुनिपातवत् व्यर्थं भवति ।

मलमासे यद्यत् कर्म विहितम् यद्यत् कर्म अविहितं तत् तत् सम्यक् ज्ञात्वा तत् सम्बन्धिकार्ये कृते सति प्रत्यक्षं वा परोक्षं कृतकर्मणः समीचीनं फलमवश्यमेव प्राप्यते । शास्त्रे मलमासे यद् कर्म विहितं तत् कर्म येन

केन प्रकारेण कर्तव्यमेव यत्कर्म अविहितं तत्कर्म शुद्धमासे कर्तव्यं भवति । पुरुषोत्तममाससम्बन्धि-जप-तप-कथाश्रवणनियमपालन सम्बन्धे तु पूजापाठदानादिकं शास्त्रोक्तेन विधिना करणीयम् । तस्मिन् विषये महर्षिभिः लिखितप्रमाणेन सिध्यति यदवश्यमेव तादृशकर्मणः कृत्वा शास्त्रोक्तं फलं लभ्यते एव तत्र न कापि भ्रान्तिः कार्या । शास्त्रविहितत्वात् तत्र न कापि भ्रान्तिः भवति । अतः मलमासे शुद्धमासे आचरणीयाणि कार्याकार्यकर्माणि अस्मिन्ननुसन्धानात्मके लेखे प्राज्ञिकायाः जिज्ञासायाः पूरणाय यथाशक्यं प्रयत्नः विहितः । एतेन पाठकस्य मलमाससम्बन्धिता जिज्ञासा तत्र कर्तव्याकर्तव्यविषयिका च जिज्ञासा पूर्णा स्यात् तर्हि मे प्रयासः सफलो भवेत् । अस्तु ।

## सन्दर्भग्रन्थसूची

उपाध्यायः, काशीनाथः(२०७७), *धर्मसिन्धुः* (टीका-हेमराजपौडेलः), विद्यार्थी पुस्तक भण्डारः ।

गौतमः, प्रा.डा.रामचन्द्रः (२०५३), *आशौच विवेचन*, म.सं.वि. ।

घिमिरे, ऋषिराम एवम् सुवेदी, कुलचन्द्रः (सम्पादकौ), (२०५७), *श्राद्धविधिः*, म.सं.वि.।

जोशी, पं.केदारनाथः, (सन् १९७९), *मुहूर्त चिन्तामणि*, मोतीलाल बनारसीदासः ।

*पुरुषोत्तममासमाहात्म्यम्*, दुर्गा साहित्य भण्डार ।

भट्टः, विष्णुः, (२००६), *पुरुषार्थचिन्तामणि,* सम्पूर्णानन्द सं.वि.वि. ।

भट्टः, श्रीकमलाकरः, (२०७१), *निर्णयसिन्धुः* (टीका- प्रा.डा.वेणीमाधव ढकालः) विद्यार्थी पुस्तक भण्डार ।

माधवाचार्यः, (२०४५), *कालमाधवः* (सम्पादकः डा. कपिलदेवगिरिः), चौखम्भा संस्कृत संस्थानम् ।

हेमाद्री, (सन् १९८९), *चतुर्वर्गचिन्तामणिः* (कालनिर्णयः), चौखम्भा संस्कृत संस्थानम् ।